Gyanshauryam, International Scientific Refereed Research Journal
© 2023 GISRRJ | Volume 6 | Issue 1 | ISSN : 2582-0095

# श्रीवैखानसभगवच्छास्त्रोक्त उत्सवे बलिहरणविधिः

Dr. T. Brahamacharyulu
Assistant Professor, Department of Vaikhanasa Agama Sri Venkateswara Vedic University, Tirupati

**Article Info**
**Publication Issue :**
Volume 6, Issue 1
January-February-2023
**Page Number :** 94-99
**Article History**
Accepted : 01 Feb 2023
Published : 25 Feb 2023

**शोधसारांशः-** जगदिदं सुखशान्तिकारकं देवप्रासादं परमकारुणिकैः ऋषिभिः अस्मान् प्रदत्तं दैववैभवम्। तत्र भिन्नभिन्न देवतानां निवासं कुर्वन्तः तेषां कृते बलिविधानं विहितम्। त एव बलिविधानं बहुप्रकारकं भवति। लोके तावत् एतद्विषये स्पष्ट अवधारणार्थं, तस्या वैशिष्ट्यं प्रकाशनार्थं शोधलेखमिदम्।।

**कुञ्चिकाशब्दाः-** बलिद्रव्यलक्षणम्, बलिनिर्वापणक्रमः, ग्रामबलिः, पश्चिमादिप्रागन्त एकवीथियुक्तग्रामे बलिहरणविधानम्, राजधान्यां बलिनिर्वापणविधिः, बलिकालः।

**उपोद्घातः**- अचिन्त्या दिव्याद्भुत स्वभाव लावण्य रत्नाकरं, निर्गुणं, निराकारं, जगज्जन्मादि लयकारकं,परमात्मानं प्रप्तुं अनेके मार्गाः महर्षिभिःअनुगृहिताः।उपदिष्टेषुमार्गेषु तरुणमार्गःअनयासेन मोक्षंप्रप्तुं समूर्तभगवद्यजन मार्गः भगवता विखनसा दर्शितः। निष्कलात्मको विष्णुःपरमात्मा भक्त्याध्यानमधनेन सङ्कल्पात् सकलोभवति इति महर्षिवाक्य प्रमाणेन सः परमात्मा करचरणादि अवयवैः सुरूपां प्रतिमां विष्णोः प्रसन्नवदनेक्षणां इत्यादि रूपेण भगवन्तं प्रतिष्ठाप्य भक्त्यापरमात्मानं ध्यात्वा अर्चामार्गेण देवैरप्यन्यभिलक्ष्यं ब्रह्मपदं प्राप्नोतीति श्रीवैखानस भगवच्छास्त्रं सधैर्यं स्पष्टीकरोति।तादृशं परमात्मानं अर्चयितुं द्वौमार्गौ वर्तेते । एकः गृहार्चानामार्गःअपरः आलयार्चनामार्गः।अत एवेक्तं

**स्वार्धं गृहार्चनं प्रोक्तं परार्धन्त्वालयार्चनं।**
**परार्धंस्याज्जगचक्षुः स्वार्धंस्यद्गृहदीपिका**[1]**।।**

इत्युक्तदिशा विश्वकल्याणाय आलायार्चनमेवेति सुष्टु अवगम्यते।तादृक् आलयार्चनं बहुभिः महर्षिभिःबहुप्रकारैः उपन्यस्तम्।परन्तु वैखानसागमे निरूपितं यदर्चनं यःउत्तमः क्रमः अन्येभ्यः व्यावृत्तिं संपाद्य स्वीयं वैभवं लोकाय ख्यापयति ।तादृशेषु अर्चनोत्सवेषु अन्यतमं कार्यं बलिहरणं इति कुतः इत्युक्ते भगवान् स्वकीय दिव्यमंगल विग्रह दर्शन पुरस्सरं आलयगत परिवारदेवताभ्यः ग्रामस्थित दिक्पालेभ्यः ग्रामस्थित अवशिष्टेभ्यःसर्वोभ्यश्च सर्वातिशय पौष्टिकत्वं प्रददाति।
सुर ऋषि मनुष्याणां बलं यस्मात् प्रवर्धते तस्मात् बलिरिति व्याख्यातं इत्युक्त्वात् बलिहरण विधानं यथा शास्त्रं परिचयितुं प्रयते।

**बलिद्रव्यलक्षणम्-**बलिनिर्वापणार्थं द्रोणैः द्रोणार्धैराढकैः तदर्धतण्डुलैः पक्वम् आज्यमिश्रं बलिम् एकस्मिन् कटाहे प्रक्षिप्य, तस्मिन् मुद्गनिष्पावतिल-तिल्व-अपूप-सक्तुलाजैश्च यथालाभैः सम्मिश्रीकृत्याचार्यः शिष्येण तत्पात्रं वाहयित्वा, तत्तत्स्थानेषु बलिं निर्वापयेदित्येव विमानार्चनकल्पे प्रोक्तम्[2]। प्रकीर्ण[3]-यज्ञाधिकारयोः[4] एवमेवोक्त्वा तस्मिन् पक्वमपूपमपि योजनीयमित्युक्तम्। पुष्पगन्धाक्षतैर्युक्तं बलिमाहरेदिति समूर्तार्चनाधिकारे चोक्तम्[5]।

[1]. अर्चनानवनीतम् - पु-2
[2]. विमा-पृ-324, 444-10
[3]. प्रकी - 24 अ, 13, 14 श्लो

**Copyright:** © the author(s), publisher and licensee Shauryam Research Institute. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**बलिनिर्वापणक्रमः**–सकलवाद्यघोषसमायुक्तं रथे वा शिबिकायां वा ध्वजमारोप्यालङ्कृत्य, तदन्येषु वा शिरसि वा चक्रवीशशान्तानलङ्कृत्य धृत्वा अन्नार्घ्यपुष्पबलीन् स्वीकृत्याचार्यः अग्रतो गच्छेत्। ततः चक्रवीशशान्तध्वजाः तत्पश्चात् देवस्य बलिबेरं च अन्वगच्छेयुः[6]। तत्र तु प्रथमं गर्भदेहस्थदेवानां ब्रह्मादीनां, ततः द्वारदेवानां, पश्चात् विमानपालेभ्यः लोकपालेभ्य अनपायिभ्यश्च तत्तन्नामसंस्मरणपूर्वकं बलिसमर्पणं कर्तव्यमित्येवं यज्ञाधिकार[7]–प्रकीर्णाधिकारयोः[8] सुस्पष्टीकृतम्। तत्र तु विमानं यस्यां दिशि वर्तते तद्दिशमारभ्य बलिनिर्वापणं कर्तव्यमिति निर्णयः कृतः समूर्तार्चनाधिकार[9]–यज्ञाधिकार[10]–प्रकीर्णाधिकार[11]–वासाधिकारेषु[12]।

**अर्थात्** – प्राच्यां दिशि विमानं चेत् ऐन्द्रादीशानान्तं, दक्षिणे चेत् यमादाग्नेयान्तम्। पश्चिमे चेत् वरुणान्नैरुत्यान्तम्, उत्तरे विमानं चेत् कुबेरात् वायव्यान्तं बलिं दद्यात्। एवमेव आलयबलिनिर्वापणं ग्रामबलिप्रदानञ्च कर्तव्यम्।

**ग्रामबलिः** – ग्रामं गत्वा ब्रह्मादिभ्यः बलिनिर्वापणं कुर्यात्। ग्राममध्ये ब्रह्माणं, गोपुरदिशमारभ्य तत्तद्दिक्सन्धिषु तत्तद्दिगीशान्, भूमौ दर्भेष्वावाह्य अर्घ्यान्तमभ्यर्च्य, तत्तन्नामभिः मुष्टान्नं बलिं प्रदाय, तस्मात् प्राच्यां भूतेभ्यः, दक्षिणे यक्षेभ्यः, पश्चिमे राक्षसेभ्यः, उत्तरे नागेभ्यः, ऊर्ध्वे राक्षसेभ्यः, बलिं क्षिप्त्वा, पुनरुदकं पुष्पबलिं च प्रदाय, धूपदीपसमायुक्तं घण्टानादनृत्तगेयवाद्यैस्सह[13] यस्यां दिशि यदुक्तं

---

4. द्रोणार्दोणार्धकैर्वाऽथ आढकैर्वाऽथ तण्डुलैः।
पाचयित्वा कटाहे तु प्रक्षिपेद्विधिचोदितम्।।
मुद्गनिष्पावतिल्वांश्च लाजापूपौ प्रगृह्य च।
हेमपात्रे सुसन्न्यस्य शिष्यस्तच्छिरसा वहेत्।। यज्ञा – 39 अ, 2–3 श्लो

5. पक्वमन्नं बलिं पात्रे पक्वापूपसमन्वितम्।
पाकैश्च मुद्गनिष्पावतिलतिल्वैश्च मिश्रितम्।।
पुष्पगन्धार्चितैर्युक्तं प्रभूतं बलिमाहरेत्। समू – 54 अ, 48–49 श्लो

6. विमा – पृ–324

7. गर्भगेहस्थदेवानां ब्रह्मादीनां च पूर्ववत्।
निक्षिप्य तद्बलिं पश्चाद्द्वारेशानां पुनः क्षिपेत्।।
पुनर्विमानपालेभ्यो लोकपालेभ्य एव च।
अन्येभ्योऽप्यनपायिभ्यः तत्तन्नाम्ना बलिं ददेत्।। यज्ञा – 39 अ, 8–9 श्लो

8. प्रकी – 24 अ, 98–99 श्लो

9. यस्यां दिशि विमानं स्यात्तद्दिक्पूर्वं बलिं ददेत्।
एवं ग्रामे बहिर्वीथ्यां तत्र सन्धौ बलिं ददेत्।। समू – 54 अ, 66 श्लो

10. यस्यां दिशि विमानं चेद्ब्रह्मस्थानादिकं बलिम्।
आचरेदथवा तस्य दिगीशादिबलिं क्षिपेत्।।
पश्चिमादिविमानं चेद्वरुणस्य वायुसोमयोः।
बलिं दत्वाऽथ शम्भोस्तु क्षिपेदन्यानि पूर्ववत्।। यज्ञा – 39 अ, 16–17 श्लो

11. प्रकी – 24 अ, 105–106 श्लो

12. वासा – 33 अ, 14 श्लो

13. गरुडताळं तथा घोष्य विष्णुताळमतःपरम्।
ब्रह्मताळादिकं घोष्य ईशानान्तानि घोषयेत्।।
तथैव वारुणादीनि तद्दिक्सूक्तानि घो,येत्। वासा –31 अ, 86–87 श्लो

तदुक्तदिशा गद्यपद्यघोषणपूर्वकं[14] सर्वं करणीयम्। ग्रामाग्रहारयोः गद्यपद्यादिघोषणं विना नगरराजधान्यादिषु कर्तव्यमिति संहितासु प्रोक्तम्[15]। ग्रामाग्रहारादिषु मन्त्रसहितं करणीयमित्यलम्। एवं ब्रह्मादि दिक्पालान्तं बलिनिर्वापणं नवसन्धिरित्युच्यते लोके। तत्र तु विशेषेण एकस्मिन् पत्रे ताम्बूलं कूर्चञ्च निधाय तस्मिन् आवाहनार्चनादीनि च देवतागौरव क्रियामर्यादेन च कुर्वन्ति अर्घ्यान्तमिति यज्ञाधिकारवचनात्[16]। सर्वत्र संहितासु भूमावेवावाहनं विहितम्।

**वासाधिकारोक्तब्रह्मादि – तत्तद्दिगीश – वाद्यघोषणविवरणम्**[17] –

| क्र.सं. | देवतानाम | रागः | तालः |
|---|---|---|---|
| 1. | इन्द्रः | समः | गान्धारः |
| 2. | अग्निः | धावनः | नाटः |
| 3. | यमः | भृङ्गिः | कौशिकः |
| 4. | निरृतिः | मल्लः | कौशिकः |
| 5. | वरुणः | भृङ्गिः | काम्भोजः |
| 6. | वायुः | सङ्करी | गौलिः |
| 7. | कुबेरः | बभ्रुः | नाटः |
| 8. | ईशानः | वृषः | इन्दोलः |

दिशां विदिशां च मध्ये सन्धिषु (अन्तवीथिषु) भूतयक्षराक्षसनागेभ्यः बलिं ददेत्। तादृशसन्धिषु अन्तर्गतवीथिषु अन्तो गत्वा, बलिं न देयमिति तदनर्थमिति च यज्ञाधिकारे सुस्पष्टमुक्तम्[18]।

**पश्चिमादिप्रागन्त एकवीथियुक्तग्रामे बलिहरणविधानम्** – ग्रामे पश्चिमादिप्रागन्तम् एका एव वीथी यदि भवेत् तथा पश्चिममारभ्य बलिं ददेत्[19]।

---

14. पुष्पं बलिं तथाऽऽधावं सन्ददेच्चक्रसन्निधौ।।
धूपदीपसमायुक्तं घण्टानादसमायुतम्।
नृत्तगेयसमायुक्तमुक्तमुक्तदिशो यथा।। यज्ञा – 39 अ, 14-15 श्लो

15. ग्रामाग्रहारयोश्चैव वाद्यघोषं विनाचरेत्।
नगर्यां राजधान्यां वा पट्टणे खर्वटेऽपि वा।।
दण्डके कुटिकादौ च घोषयेद्देशिकोत्तमः। वासा – 31 अ, 97-98 श्लो

16. ग्रामं गत्वा तु सम्प्राप्य सन्धौ सन्धौ विशेषतः।
ध्यात्वा बुद्ध्याऽधिपान् मन्त्री भूमावावाह्य पूर्ववत्।।
अर्घ्यान्तं च समभ्यर्च्य मुष्ट्यन्नं नामभिर्ददेत्। यज्ञा – 39 अ, 11-12 श्लो

17. वासा – 31 अ, 100 तः 107 श्लो, 118. यज्ञा – 39 अ, 18 श्लो

18. प्रागन्तं पश्चिमाद्यं च एकवीथिं च दण्टकम्।।
कुर्यात्तत्र च चक्राद्यैः पश्चिमाद्यं बलिं क्षिपेत्।
वरुणनिर्ऋतिवायुभ्यः पश्चिमे तु बलिं ददेत्।।
धातृयमकुबेरेभ्यः सन्धौ मध्ये बलिं क्षिपेत्। यज्ञा – 39 अ, 26 तः 28 श्लो

19. उदगन्तमेकवीथिश्चेद्दक्षिणाद्यं बलिं क्षिपेत्।
यमनीलानलेभ्यश्च दक्षिणे मध्यमे तु वा।।
ब्रह्मवारुणशक्रेभ्यश्चोत्तरे च बलिं क्षिपेत्।

अर्थात् – वरुणनैर्ऋतिवायुभ्यः पश्चिमे ब्रह्मयमकुबेरेभ्यः मध्यमे इन्द्राग्नि ईशानेभ्यः, प्राच्यां बलिप्रदानं करणीयम्।

| | | | | |
|---|---|---|---|---|
| | | प | | |
| | नि | **व** | वा | |
| द | य | **ब्र** | कु | उ |
| | आ | **इ** | ई | |
| | | प्रा | | |

दक्षिणाद्युदगन्तं यदि ग्रामवीथिः भवेत् तथा यमाग्निनिर्ऋतिभ्यः दक्षिणे ब्रह्मवरुण इन्द्रेभ्यः, मध्यमे कुबेरवाय्वीशानेभ्यश्च उत्तरे बलिं प्रदद्यात् इति[20] –

| | | | | |
|---|---|---|---|---|
| | | प्रा | | |
| | ई | इ | आ | |
| उ | **कु** | **ब्र** | **य** | द |
| | वा | व | नि | |
| | | प | | |

वास्तुशास्त्रोक्तवद्विराजितग्रामादिषु बलिमालाक्रममनुसृत्य ब्रह्मेन्द्रादीशानान्तं बलिं दद्यात्। तत्र ब्रह्मस्थानं गोपुराग्रे गोपुरस्य पुरतो समन्तु वा गोपुरे एव वा करणीयमिति यज्ञाधिकारे[21] –

| | | | | |
|---|---|---|---|---|
| | | प्रा | | |
| | ई | इ | आ | |
| | | ब्र | | |
| उ | कु | आलयः | म | द |
| | वा | व | नि | |
| | | प | | |

**राजधान्यां बलिनिर्वापणविधिः –** राजधान्यां विशेषेण राजप्रासादमन्ततो गत्वा तत्र राजवेश्माभिमुखाङ्गनं त्रिभागं कृत्वा, तत्र पश्चिमे भागे प्रासादसमीपे विशेषेण देवराज्ञे –

**इन्द्राय विष्णवे तुभ्यं नमोऽस्तु पृथिवीपते ।**

**रक्षस्व जगतीमेतामपि मामिति चोच्चरेत् ।।**

इत्युक्त्वा जयश्रियै च तत्पार्श्वे शचीदेव्यै च द्वारपार्श्वयोः शङ्कनिधिपद्मनिधिभ्याञ्च बलिं दद्यात्। ततः पूर्वोक्तवत् इन्द्रादिस्थानमासाद्य, बलिं दद्यात् इति खिलाधिकार[22] विमानार्चनकल्पयोः[23] प्रोक्तम्।

---

कुबेरपवनेशेभ्यो बलिं दद्यात्क्रमेण च।। यज्ञा – 39 अ, 29–30 श्लो

20. बलिमालाऽथ वास्तौ चेदिन्द्रादिभ्यो बलिं ददेत्।
मध्ये वीथिं तथेन्द्रेष्टौ गोपुराग्रे उदङ्मुखः।।
ब्रह्माणं च बलिं दद्यात्सर्ववीथ्यां समन्तु वा। यज्ञा – 39 अ, 31–32 श्लो

21. खिला – 32 अ, 113 तः 116 श्लो

22. विमा – पृ–334

23. वासा – 33 अ, 9 तः 13 श्लो

**विशिष्य वासाधिकारे एवमुक्तम् –**आलयबलिनिर्वापणानन्तरं राजवेश्म गत्वा तद्गृहात् पूर्वे भूमौ मध्यमे सर्वभूतेभ्य: ब्रह्मणे च बलिं क्षिपेत् तत्पूर्वे यक्षराजाय द्वारस्य दक्षिणवामयो: शङ्कनिधिपद्मनिद्यो: बलिं दत्वा वेश्मनिर्गमने इन्द्रस्थाने इन्द्राय तत: वेश्मन: प्रादक्षिण्यक्रमेण लोकपालनां यथाक्रमं बलिं दद्यादिति विशेषेण प्रोक्तम्[24]।

**राजधान्यां महाग्रामे च वीथीविवेक: –**राजधान्यां महाग्रामेषु च बलिक्रमविधि: चतुर्थोच्यते। तत्र राजवीथी, महावीथी, बहुवीथी, अल्पवीथी, नाभिर्वीथी, महावीथी, बाह्यवीथी इत्यादय: बहुवीथय: भवन्ति।

नाभिवीथ्यां अभ्यन्तरे मध्ये च मङ्गलवीथी बाह्ये पैशाचवीथी च भवत: मध्यमे तिर्यग्वीथिषु क्षुद्रका: भवन्तीति वासाधिकारे प्रोक्तम्[25]।

तत्र इन्द्रादीनां बलिहरणं महावीथ्यामेव कर्तव्यमिति चोक्तम्। यदि विमानं नदीसमुद्रतीरे वा पर्वतवनादिषु वा भवति तदालये एव सर्वं करणीयमिति च प्रोक्तं संहितासु[26]। इत्येवं शास्त्रोक्तदिशा तत्तत्स्थानेषु –

**देवेशस्योत्सवं द्रष्टुमागच्छन्त्यत्र देवता: ।**
**स्वगणैस्सह तिष्ठन्तु बलिं भुञ्जन्तु सादरम् ।।**

इत्युक्त्वा बलिं निर्वपेदिति खिलाधिकारे[27] सुस्पष्टमुक्तम्।

**बलिकाल: –**

**आरम्भदिवसात्पूर्वमवसानदिनादध: ।**
**कालद्वयं बलिं दद्याद्दिशं प्रति तथैव च ।।**

कालद्वयं बलिं दद्यादिति वासाधिकारे[28] चोक्तम्। एतदनुसृत्यैव लोके प्रातस्सायङ्कालयो: बलिनिर्वापणं कुर्वन्ति।

**बलिनिर्वापणे तरतमविवेक: –** आलयबलिनिर्वापणे तत्तदालयाश्रितदेवेभ्य:, एवं ग्रामबलिनिर्वापणे सर्वेभ्यो देवेभ्य: सर्वेभ्यो ऋषिभ्य:, एवं पितृभ्य: तत्तत्पत्नीभ्य: सिद्धविद्याधरगरुडगन्धर्वयक्षकिन्नरनागभूत असुरराक्षसेभ्य: अष्टादशगणेभ्य: दुर्गाज्येष्ठा महाकालीरोहिणीमितराप्सरसेभ्य: विष्णुभूतेभ्यश्च तत्तत्परिवारगणैस्सह बलिं दद्यादिति सर्वासु संहितासूक्तम्[29]। विशिष्य ज्ञानकाण्डे एतैस्सह बलि–वैरोक्षनीपूतसृङ्गीपूतनापरकीदेवारिपिशाचेभ्यश्च तत्तन्नाम्ना बलिं दद्यादिति प्रोक्तम्।

---

[24]. राजवीथी महावीथा बहुवीथी तथैव च।
अल्पवीथी समायुक्ता राजधानी विशेषत:।।
नाभिवीथी समायुक्तं बाह्यवीथी तथैव च।
क्षुद्रवीथी समायुक्तं चतुर्विधमिति स्मृतम्।
नाभ्यामन्तरे चैव तन्मध्ये मङ्गळवीथी।
बाह्ये पैशाचवीथी च नाराचेन समायुतम्।।
नाराचे मध्यमे चैव तिर्यग्वीथिषु क्षुद्रका:। वासा – 33 अ, 2 त: 5 श्लो

[25]. नद्यादिषु विमानं चेत्परित: प्रावरणे ददेत्।
पूर्वं क्षिप्त्वा बलिं धीमान् पुनस्तस्य च तस्य च। यज्ञा – 39 अ, 33 श्लो, प्रकी – 24 अ, 114 श्लो

[26]. खिला – 32 अ, 42, 43 श्लो

[27]. वासा – 33 अ, 11, 12 श्लो

[28]. विमा – पृ–324, यज्ञा – 39 अ, 35 त: 38 श्लो, प्रकी – 24 अ

[29]. त: 119 श्लो, समू – 54 अ

एवं विमानार्चनकल्पे उत्तममध्यमाधमभेदेन उक्तम्[30]। तत्तद्बलिस्थानेषु प्रागादिदिक्षु सर्वेभ्यो देवेभ्यो भूतेभ्यो यक्षेभ्यो राक्षसेभ्यः पिशाचेभ्यो नागेभ्यो गन्धर्वेभ्योऽष्टादशगणेभ्यश्च बलिं दद्यादुत्तमम्। प्रागादिचतुर्दिक्षु सर्वेभ्यो भूतेभ्यो यक्षेभ्यो राक्षसेभ्यश्च बलिं दद्याच्चेत् मध्यमम्। एवं विना केवलं तत्तदिगीशेभ्यः दद्यादधममिति च सुस्पष्टमुक्तम्।

इत्येवं बलिनिर्वापणक्रमः सुस्पष्टमभिहितं वैखानसभगवच्छास्त्रीयसकलसंहितासु। एतत् बलिनिर्वापणं देवादीनां बलिवर्धकं स्यादिति च प्रोक्तम्। यथा –

**देवादीनां बलं यस्मात् वर्धते बलिरिति स्मृतः[31]।**

**उपसंहारः –** इत्थं वैखानसागमोक्तप्रकारेण उत्सवे विहित अकृतबलिहरणम् आलयाश्रित ग्रामाश्रित देवताः सन्तुष्टान्तरङ्गाः सन्तः विश्वकल्याणाय राजमार्गं प्रदर्शयन्तः मुमुक्षुभ्यः सर्वदा तृप्तिकरं जीवनं प्रयच्छन्तीति सिद्धान्तस्य आशयः।

**तद्विष्णोः परमं पदम्।।**

**उपयुक्तग्रन्थसूची**


1. **विमानार्चनाकल्पः** - सम्पादकः – अग्निहोत्रं. श्रीनिवासाचार्युलु, श्रीवेङ्कटेश्वरस्वमि देवस्थानम्, द्वारकातिरुमला, तेलुगु, 2014 वस्तरः
2. **खिलाधिकारः** - सम्पादकः – पार्थसारथि भट्टाचार्युलु, ति.ति.देवस्थानम्, तिरुपति, 1997
3. **वासाधिकारः** - सम्पादकः –दीवि.वेङ्कटरामाचार्युलु, ति.ति.देवस्थानम्, तिरुपति, 1997
4. **प्रकीर्णाधिकारः** - सम्पादकः – एम्.के.श्रीनिवासभट्टाचार्युलु, ति.ति.देवस्थानम्, तिरुपति, 1997
5. **समूर्तार्चनाधिकारः** - सम्पादकः –पि.रघुनाथचक्रवर्ति बट्टाचार्युलु, ति.ति.देवस्थानम्, तिरुपति, 2014
6. **क्रियाधिकारः** - सम्पादकः – पार्थसारथि भट्टाचार्युलु, ति.ति.देवस्थानम्, तिरुपति, 1998
7. **ज्ञानकाण्डम्** - सम्पादकः – पार्थसारथि भट्टाचार्युलु, ति.ति.देवस्थानम्, तिरुपति, 1997
8. **यज्ञाधिकारः** - सम्पादकः – पार्थसारथि भट्टाचार्युलु, ति.ति.देवस्थानम्, तिरुपति, 1999
9. **अर्चनानवनीतम्** - सम्पादकः–केशवाचार्यः, ति.ति.देवस्थानम्, तिरुपति, 1998


[30]. तः 62 श्लो, काश्य.ज्ञा – पृ–175

[31]. प्रकी – 28 अ, 361 श्लो